# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा** – आचार्य-**2** | **सत्रम् – 3** | **गुणाः - 70** |
| **विषयः – वेदः** | **प्रश्नपत्रम् - 4 - CC - 5.3.9** | **समयः- 3 तः 6** |
| **दिनाङ्कः- 12/10/2019** | **संदर्भग्रन्थः** – कात्यायनश्रौतसूत्रम् | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 सूत्रमेकं व्याख्येयम् ।** **05**

1. सोमेन वोपक्लृप्तसोमः ।
2. अग्निं विहृत्य सप्तसु प्रक्रमेष्वर्द्धव्यामे च साग्निचित्ये ।

**प्र-2 एकस्य निबन्धात्मकमुत्तरं लिखत ।** **10**

1. सोमयागस्य कालः ।
2. यजमानस्य पावनम् ।

**( द्वितीयान्वितिः - युनिट-2 )**

**प्र-3 सूत्रमेकं व्याख्येयम् ।** **05**

1. तेन केशश्मश्रु वपति ।
2. एकशतेन वा राजसूये ।

**प्र-4 एकस्य निबन्धात्मकमुत्तरं लिखत ।** **10**

1. ज्योतिष्टोमस्य चतस्रः संस्थाः स्पष्टयत ।
2. आहृतस्य सोमस्य शालायां निधानविधिं लिखत ।

**( तृतीयान्वितिः - युनिट-3 )**

**प्र-5 सूत्रमेकं व्याख्येयम् ।** **05**

1. विक्रयेन विचिनोति कौत्सः शूद्रो वा ।
2. पञ्चकृत्वः सोमं पणते ।

**प्र-6 एकस्य प्रश्नस्य उत्तरं ग्रन्थानुसारं लिखत ।** **10**

1. सोमक्रयार्थं विक्रेत्रा सह कीदृशो व्यवहारः करणीयः - ग्रन्थानुसारेण लिखत ।
2. कृष्णाजिनादिदीक्षा - ग्रन्थानुसारेण लिखत ।

**प्र-7 एकस्यैव सूत्रस्य व्याख्यां लिखत। 05**

1. भूयो वा अतः सोमो राजाऽर्हतीत्याहसोमविक्रयी।
2. एकं चेद् ग्रीवा अवकृत्य।

**(चतुर्थान्वितिः - युनिट-4 )**

**प्र-8 एकस्य निबन्धात्मकमुत्तरं लिखत। 10**

1. सोमं प्रति गच्छतो यजमानस्य वाचनम्।
2. यूपच्छेदनविधिः।

**प्र-9 दशानां लघूत्तराणि लिखत। 10**

1. सोमयागस्य कति संस्थाः  का च ताः
2. सप्तमाऽध्याये सोमयागनिरूपणे कति कण्डिकाः सन्ति
3. केशश्मश्रु कः वपति यजमानस्य
4. कात्यायनश्रौतसूत्रस्य सप्तमाऽध्यायस्य द्वितीयकण्डिकायां कति सूत्राणि सन्ति
5. राजसूययागे कियदिम्: यजमानं पुनाति
6. यागशालायां यजमानम् अध्वर्युः केन द्वारेण प्रवेशयति
7. आसनार्थं किम् आस्तरणं कार्यम्
8. आहवनीयगर्हपत्ययोः पश्चान्मार्गेण कः पत्नीं प्रवेशयति
9. दीक्षितेन यजमानेन स्वाङ्गानां कण्डूयनं केन वस्तुना कार्यम्
10. उच्छ्रितं दण्डं यजमानः कुत्र निदध्यात्
11. कम् अभिमुखो भूत्वा व्रतं कृणुत
12. कीदृशः पाको यवागूः कथ्यते
13. क्रोधकरणे अश्लीलभाषणे च यजमानः प्रायश्चित्तार्थं किं पठेत्
14. सुत्यासु वर्तमानासु कुत्र आसितव्यम्
15. कात्यायनश्रौतसूत्रे कति अध्यायाः सन्ति

***************